विजातीयत्वेऽपि स्थानसाम्यमस्ति । ३ग्रन्थपरिच्छेदे यथा स्वर्गवर्गः पातालवर्गः । ४अङ्कशास्त्रोक्ते समानाङ्कद्वयस्य परस्परगुणने यथा द्विकस्य चत्वारि, त्रिकस्य नव, चतुष्कस्य षोड़श इत्यादि । "स्थाप्योऽन्त्यवर्गः" "वर्गं मूलं पदं कृतिम्" इति च लीला० । वृज–घञ् ।५त्यागे । ग्रन्थपरिच्छेदाश्च बहुविधाः यथा "सर्गोवर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः । उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम् । स्थानं प्रकरणं पर्वाह्निकञ्च ग्रन्थसन्धयः" त्रिका० ।

**वर्गप्रकृति** वीजगणितोक्ते गणनाप्रकारभेदे तत्र दृश्यम् ।

**वर्गमूल** न० वर्गस्य समद्विघातात्मककृतेः मूलम् । अङ्कशास्त्रप्रसिद्धं समाङ्कद्वयेन हताङ्कसङ्ख्यायाः यन्मूलं घातसाधनं तत्र । यथा षोड़शानां चत्वारि नवानां त्रयः चतुर्णां द्वौ इत्यादि ।

**वर्गोत्तम** पु० वर्गेषु षट्सु चेत्रादिषु उत्तमः नवांशः । "चराणां प्रथमे चांशे स्थिराणां पञ्चमे तथा । द्व्यात्मकानाञ्च नवमे वर्गोत्तम इति स्मृतः" इति ज्योतिषोक्ते त्रिंशांशकात्मकराशेर्नवांशभेदे ।

**वर्च** दीप्तौ भ्वा० आत्म० अक० सेट् । वर्चते अवर्चिष्ट ।

**वर्चस्** न० वर्च–असुन् । १रूपे २शुक्रे ३तेजसि ४विष्ठायाञ्च मेदि० ।५चन्द्रपुत्रे पु० "रोहिण्यामभवद्यस्तु वर्चस्वी येन चन्द्रमा" वह्निपु० । स्वार्थे क । विष्ठायाम् अमरः ।

**वर्चस्विन्** त्रि० वर्चस्+अस्त्यर्थे विनि । तेजस्विनि स्त्रियां ङीप् ।

**वर्जन** न० वृज-ल्युट् । १त्यागे २हिंसायां च ३मारणे मेदि० ।

**वर्ण** स्तुतौ विस्तारे शुक्लादिवर्णकरणे उद्योगे दीपने च अदु० चु० उभ० सक० सेट् । वर्णयति ते अववर्णत् त ।

**वर्ण** वर्णने चु० उभ० सक० सेट् । वर्णयति ते अववर्णत् त ।

**वर्ण** न० वर्ण–अच् ।१कुङ्कुमे न० २स्वर्णे ३व्रते ४शुक्लादिरूपे ५अकाराद्यक्षरे ६भेदे ७गीतक्रमे ८चित्रे ९तालभेदे १०अङ्गरागे पु० हेमच० । ११गजचित्रकम्बले पु० अमरः १२यशसि १३गुणे १४स्तुतौ पु०मेदि० । भेदे रूपे अक्षरे पु० न० मेदि० । १५ब्राह्मणादिजातौ पु० अमरः । "चातुर्वर्ण्यं मया सृष्टम्" गीता ।

तत्र विप्रादिवर्णानां सृष्टिः तद्धर्माश्च मनुना उक्ता यथा "लोकानान्तु विवृद्ध्यर्थं मुखबाहूरुपादतः । ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्त्तयत्" । "मुखबाहूरुपज्जानां पृथक् कर्माण्यकल्पयत् । अध्यापनमध्ययनं यजनं याजनन्तथा" "ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत" यजु० ३१।११ तेषां ब्राह्मणस्य श्रैष्ठ्ये कारणं मनुनोक्तं यथा "ऊर्ध्वं नाभेर्मेध्यतरः पुरुषः परिकीर्त्तितः । तस्मान्मेध्यतमं त्वस्य मुखमुक्तं स्वयम्भुवा । उत्तमाङ्गोद्भवात् ज्यैष्ठ्याद् ब्रह्मणश्चैव धारणात् । सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः" वर्णधर्माश्च जातिधर्मशब्दे ३१०५पृ० दृश्याः ।

तत्र अक्षररूपवर्णोत्पत्तिक्रमः तद्भेदाश्च शब्दार्थरत्नेऽस्माभिरुक्ता यथा

"अथ वर्णोत्पत्तिप्रकारस्तावदभिधीयते । चेतनेन ज्ञातार्थविवक्षया तद्बोधकशब्दनिष्पादनाय प्रेरितमन्तःकरणं मूलाधारस्थितमनलं चालयति तच्चालितश्चानलः तत्स्थलस्थानिलचालनाय प्रभवति तच्चालितेन चानिलेन तत्रैव सूक्ष्मरूपेणोत्पादितः शब्दः परा वागित्यभिधीयते । ततोनाभिदेशपर्य्यन्तं चलितेन तेन तद्देशसंयोगादुत्पादितः शब्दः पश्यन्तीति व्यवह्रियते एतद्द्वयस्य सूक्ष्मसूक्ष्मतरतया ईश्वरयोगिमात्रगम्यता नास्मदीयश्रुतिगोचरता । ततस्तेनैव हृदयदेशं परिसरता हृदयसंयोगेन निष्पादितः शब्दो मध्यमेत्युच्यते सा च स्वकर्णपिधानेन ध्वन्यात्मकतया सूक्ष्मरूपेण कदाचिदस्माकमपि समधिगम्या । ततो मुखपर्य्यन्तमागच्छता तेन कण्ठदेशं प्राप्य आहत्य मूर्द्धानं तत्प्रतिघातेन परावृत्य च मुखविवरे कण्ठादिषु तत्तदष्टस्थानेषु स्वाभिघातेनोत्पादितः शब्दो वैखरीत्युच्यते । तदुक्तं शिक्षायाम् "आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णान् जनयते तेषां विभागः पञ्चधा मतः । स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः" इति । संस्काररूपेण स्वगतानर्थान् बुद्ध्या बुद्धिरूपया समेत्य विषयीकृत्येत्यर्थः । तथा । "प्राणापानान्तरे देवी वाग्वै नित्यं हि तिष्ठति । स्थानेषु विकृते वायौ कृतवर्णपरिग्रहा । वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धिनी । केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी । प्राणवृत्तिमनुक्रम्य मध्यमा वाक् प्रवर्त्तते । अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा । स्वरूपज्योतिरेवातः परा वागनपायिनीति" भारतेऽप्युक्तम् । अत्र प्राणापानान्तरे इत्यधिकरणनिर्दे-